श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-२१

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 3 वर्षम् :- २०१८

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादकौ

**डॉ. डी. एम्. मोकरिया,** सहायकाचार्यः

**डॉ. बी. उमामहेश्वरी,** सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

प्रकाशकः -

डॉ. दशरथजादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -

डॉ. कार्तिकपण्डया
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2020*

Note : The statements and views expressed by the authors of articles in this conference proceeding are their own and not necessarily of the editors. The responsibility of the facts stated opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

| | | |
|---|---|---|
| संस्करणम् | | प्रथमम् |
| वर्षम् | | मार्च २०२० |
| प्रतिकृतय | | ३५० |
| ISBN | - | 978-93-83097-42-5 |
| मूल्यम् | - | रु. १८०/- |

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस एपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

# विषयानुक्रमणिका



| क्रमः | विषयः | पृष्ठः |
|---|---|---|
| १. | वैदिकस्वराणां वैशिष्ट्यम्<br>प्रो. देवेन्द्रनाथ पाण्डेयः | 1 |
| २. | श्रीमद्भगवद्गीतायां निरूपितानि ज्ञानलक्षणानि<br>डॉ. नरेन्द्रकुमारः एल्. पण्ड्या | 10 |
| ३. | चतुर्दशसूत्र्यां सन्ध्यभावविचारः द्विर्हकारोपात्तविचारश्च<br>प्रो. विनोदकुमार झा | 20 |
| ४. | सम्बन्धप्रियो भवभूतिः<br>प्रो. अर्चना दुबे | 30 |
| ५. | धर्मशास्त्राणुसारेण विवाहप्रथा<br>प्रो. महेन्द्रकुमारः अं दवे | 44 |
| ६. | वैदिकी देवता<br>डॉ. शत्रुघ्न पाणिग्राही | 50 |
| ७. | श्रीमद्भगवद्गीतानुसारेण शान्तिप्राप्त्युपायाः<br>डॉ. पङ्कजकुमार रावलः | 58 |
| ८. | सज्जनचरित्रम्<br>डॉ. डायालालः मोकरिया | 67 |
| ९. | गुरुत्वद्रवत्वयोः वैज्ञानिकं चिन्तनम्<br>डॉ. बी. उमामहेश्वरी | 77 |
| १०. | आत्मनः अखण्डार्थत्वम्<br>डॉ. जानकीशरणः आचार्यः | 83 |
| ११. | હકારાત્મક મનોવલણ<br>ડૉ. જયેશકુમાર ડી. મુંગરા | 96 |
| १२. | Sanskrit E-Resources on Internet<br>Mr. Ravindra Kale | 101 |
| | | |

# गुरुत्वद्रवत्वयोः वैज्ञानिकं चिन्तनम्

डॉ. बी.उमामहेश्वरी,
दर्शनसङ्कायाध्यक्षा,
सहायकाचार्या,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
वेरावलम्।

आम्नायप्रोक्त- 'अणोरणीयानि'ति मन्त्रोक्तिमनुश्रुत्य न्यायशास्त्रं प्रवर्तितमिति नातिशयोक्तिः। षडङ्गीय ज्यौतिषशास्त्रं 'महतो महीयान्' इति मन्त्रोक्तिमनुश्रुत्य प्रवर्तते। दूरात् दूरतरं दैवज्ञाः सूक्ष्मात्सूक्ष्मतरं अणुविज्ञाः अग्रे अग्रे धावितवन्तः। यथा पौराणिकगाथायां शिवलिङ्गस्वरूपप्रतिवेदनाय ऊर्ध्वमुखं विष्णुः, अधोमुखं ब्रह्मा धावितवन्तौ। एषा आख्यायिका महत्त्वाणुत्वयोः ज्ञानम् आबालगोपविधितवदवगतं कारयति। दैवज्ञानुविज्ञाः भ्रातृवत् उक्तकार्यं प्रति अद्यावधि रक्ताः। इदानीं अनुविज्ञाने न्यायवैशेषिकाः रामलक्ष्मणवत् सङ्गीभूय प्रवर्तितवन्तः। तेषां चिन्तनधारासु आविष्कृत गुरुत्वद्रवत्वविचारोऽत्र विधीयते।

गुरुत्वमित्युक्ते 'आद्यपतनाऽसमवायिकारणम्'[1] इति न्यायवैशेषिकैः प्रतिपादितम्। किन्तु पतनात्पूर्वं पतनहेतुः कः? इति चिन्तनीयम्, ऊर्ध्व-मुक्त वस्त्वादिकं पृथिवीं अभिमुखीभूय पतति। कारणं अत्रोच्यते, पृथिव्याः आकर्षणशक्तिः स्वाभाविकतया नैरन्तर्यरूपेण स्थितिवत् चलति। तदेव वस्तुपतनस्य मूलकारणं भवति। भूम्याकर्षणशक्तेः ऊर्ध्वस्थानं प्राप्नोत्यदिवस्तु तदा ततः कस्मादपि न जातु पतति। आधुनिकवैज्ञानिकाः उपग्रहान् तत्रैव प्रेषयन्ति। ततः न कदापि पतन्तीति मत्वा। तदभ्यन्तरे यानि वस्तूनि भवन्ति तेषां सर्वेषां पतनकारणं भूम्याः आकर्षणशक्तिरेव। तदेव गुरुत्वम् उत गुरुत्वाकर्षणम्।

[1]. तर्कसङ्ग्रहः - पृ-५७/ तर्कभाषा- पृ-२०४।

गुरुत्वमित्युक्ते बृहत्त्वम्, श्रेष्ठत्वं, ज्येष्ठत्वञ्च।

प्रथमं पाषाणखण्डं नीत्वा उपरिष्ठात् त्यजामश्चेत् भूमौ पतति। पाषाणखण्डात् पृथिव्यां अनेकाणुसञ्चयत्वात् बृहत्त्वम्, कालाधिक्यात् ज्येष्ठत्वम्, गुणाधिक्यात् श्रेष्ठत्वञ्च विद्यन्ते। पतनकारणं प्रति नात्र ऊर्ध्वाधोमुखं च भवति। गोलाकृतिभूमौ ये अधस्थाः जनाः यदि वस्तूनि क्षिपन्ति न तेषाम् ऊर्ध्वमुखं भवति, वस्तुतः पश्यामश्चेत् यथास्माभिः क्षेपणं क्रियते तथैव तैरपि क्रियते, तथापि वस्तूनि भूमौ एव पतन्ति। एतत् दक्षिणध्रुवस्थ जनान् प्रत्येव प्रवर्तते। वस्तुतः वयमपि वस्तूनि न ऊर्ध्वं क्षिपामः। पार्श्वे एव क्षिपामः। यथा हि गृहगोधिकाः कुड्ये लिप्त्वा इतस्ततः सर्पन्ति तथैव अस्माकमावासादिकम्। अनेन ज्ञायते यत् पतनक्रियां प्रति कारणं अधोमुखं न इति। बृहद्ग्रहः यदि पृथिव्यास्सम्मुखे आगच्छति तर्हि पृथिवीमपि आकृष्य आत्मसात् करोति। इत्थमेव अर्कः स्वशक्तिरूप-गुरुत्वाकर्षणेन इतरान् ग्रहान् चक्रवत् भ्रामयति। अत्रापि मूलकारणं गुरुत्वाकर्षणशक्तिरेव। कदाचित् भ्रान्त्यापि गुरुत्वं केवलं पतनस्य कारणं भवतीति नाभिमन्तव्यम् अपि च स्थितेरपि कारणम्। बृहज्जाबालोपनिषदि यथा -

"आधारशक्त्या अवधृतः कालाग्निरयम् ऊर्ध्वगः। तथैव निम्नगः सोम"।[2]

गुरुत्वाकर्षणशक्तिः द्विधा विभक्ता, ऊर्ध्वगा निम्नगा इति। ऊर्ध्वगा गुरुत्वाकर्षणशक्तिः आकाशे वायौ अग्नौ च विद्यते। निम्नगा गुरुत्वाकर्षणशक्तिः पृथिवीजलयोः भवति। तत्र पतनप्रवाहादिकं निम्नगानाम्। ऊर्ध्वगानां च अवधृतिः, ऊर्ध्वगं, विलयम्। भूमिस्थितेः मूलकारणम् उत्तरदक्षिणध्रुवसमानाकृष्यरूपा गुरुत्वशक्तिरेव।

पाषाणखण्डे न आकर्षणविकर्षणशक्तिः, किञ्च सूचीमुख्यां आकर्षणविकर्षणशक्तिद्वयं अपि विद्यते यथा भूमौ। यथा सूचीमुख्याः

---

[2]. बृहज्जाबालोपनिषत् - २.८।

(अयस्कान्तस्य) उत्तरदक्षिणध्रुवद्वयं विद्यते तथैव पृथिव्यामपि। तेनैव पृथिव्याः स्थिरता भवति। यदा उत्तरदक्षिणध्रुवौ भूमिं स्वाभिमुखीकर्तुं आकर्षयतः तदा भूम्याः स्थिरता भवति। न च अद्यतनवैज्ञानिकः न्यूटन् महोदयः गुरुत्वाकर्षणशक्तिं ज्ञातवानिति वाच्यम्। यथा हि न्यायवैशेषिकशास्त्रोत्पत्तिः सहस्राधिकवर्षेभ्यः प्रागभवत्। न्यूटन् महोदयस्य तु सप्तदशशताब्दे। किन्तु क्रीष्टब्दात् पूर्वं पञ्चाशदधिकैकशतवत्सरे(१५०) महर्षिपतञ्जलिना पाणिनीयोक्त 'स्थानेन्तरतमः' इति सूत्रस्योपरि स्वमहाभाष्ये एवमुक्तमस्ति,

'लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति।

नोर्ध्वमारोहति, पृथिवीविकारः पृथिवीमेव गच्छति"॥[3] इति।

तत्पश्चात्, ईषीयः षड्सप्तत्युत्तरचतुःशत(४७६)कालीनः वराहमिहिरः स्वीयपञ्चसिद्धान्तिकायाम् एवमभिहितवान् -

"पञ्चमहाभूतमयस्तारागणपञ्जरे महीगोलः।

खेऽयस्कान्तान्तस्थो लोह इवावस्थितो वृत्तः"॥[4] इति ।

अर्थात् पञ्चमहाभूतमयतारागणपञ्जरे महीगोलः अयःस्कान्तमणिद्वय-मध्ये लोहखण्डवत् इयं पृथिवी निराधारभूताकाशे स्थीयते। ततः क्रीष्टाब्दः चतुर्दशाधिकैकादशशतक(१११४)कालीनः भास्कराचार्यः स्वीयसिद्धान्तशिरोमणिग्रन्थे एवं मुक्तवान् -

"आकृष्टशक्तिश्च महीतया यत्

स्वस्थं गुरुं स्वाभिमुखं स्वशक्त्या।

आकृष्यते तत् पततीव भाति

स मे समन्तात् क्व पतत्वियं खे"॥[5]

अर्थात् पृथिव्याम् आकर्षणशक्तिर्विद्यते। अतः खे क्षिप्तं यद्वस्तु गुरुं स्वशक्त्या स्वाभिमुखम् आकृष्यति। अतः तद्वस्तु पतन्निव

[3]. पाणिनिसूत्रम् - १.१.४९। महाभाष्यम्।

[4]. पञ्चसिद्धान्तिका - ३१।

[5]. सिद्धान्तशिरोमणिः, भुवन- श्लो - १६।

प्रतिभाति इति अस्माकं आर्षवैज्ञानिकैः न्यूटन् महोदयात् सहस्राधिक-वर्षपूर्वमेव आविष्कृतम्।

न च गुरुत्वाकर्षणशक्तिः केवलं भूमौ। जले तेजसि वायौ आकाशे च विद्यते। "आकाशात्पतितं तोयं कथं गच्छति सागरम्"? इति चेत्, भूमौ पतितपाषाणं तत्रैव तिष्ठति। तथा जलबिन्दुर्नास्ति। आकाशात्पतितजलबिन्दुः सिन्धुं प्रतिगन्तुं शतधा अवरोधान् प्राप्या-ऽपि अन्ततो गत्वा सिन्धुं प्राप्य प्रवाहात्मकशान्तिं प्राप्नोति। कस्मादेवं? इति चेत् जलबिन्दोः मूलं सिन्धुरेव। अतः सिन्धुः इतस्ततः विकीर्णजलबिन्दून् आकर्षयति। तस्माज्जलेऽपि गुरुत्वाकर्षणशक्ति र्विद्यते।

पृथिवी पार्थिवांशान्, जलं जलीयांशान्, एवं अग्निः अग्नीयांशान् नैरन्तर्यं स्वाभिमुखं आकृष्यन्ते। ज्वलितदीपकणिका सदा ऊर्ध्वमेव गम्यमाना दृश्यते। किमर्थमेवं स्थितिरित्युक्ते अत्रापि अग्नेः मूलस्थानम् ऊर्ध्वलोकस्थ सूर्यः वर्तते। अतः दीपकणिका ऊर्ध्वं ज्वलन्ती दृश्यते। "षड् शतं वा भवेत्, शतं षड्वा भवेत्" इति न्यायेन शतधा प्रयत्नेपि दीपकणिका अधोमुखीभूय न ज्वलति। अत अग्निः स्वतो निर्गततेजो कणान् पुनः गोलात्मकाग्निराशिं प्रति आकर्षयति। तस्मात् वह्नावपि गुरुत्वाकर्षणशक्तिः ज्ञायते।

एवं वायौ गुरुत्वाकर्षणशक्तिः - "तत्र रूपरहितस्पर्शवान् वायुः"।[6] स द्विविधः। नित्यो अनित्यश्च। नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। यत्र वायुः परमाणुरूपं प्रतिपद्यते तत्रत्य परमाणुरूपवायुः अभितः व्याप्तान्, इतस्तत-तिर्यग्गमनशीलवायून् युगपदाकृष्यति, कारणत्वात्। एषा क्रिया समुद्रस्योपरि आकाशे प्रायः सम्भवति। तदा एव जंझावातवृष्ट्यादिकं (सैक्लोन्, सुनामी, भाड्, तुफान्) सम्भवति। कार्यरूपवायोः अणवः सजातीयकारणगतवायून् गुरुत्वाकर्षणशक्त्या स्वाभिमुखं आकृष्यन्ति। तस्माद्वायौ गुरुत्वाकर्षणशक्तिर्विराजते।

---

[6]. तर्कसङ्ग्रहः - पृ-३१।

तथैव आकाशेऽपि विद्यमानगुरुत्वाकर्षणशक्तिं विचारयामः। आकाशे आकाशगुणः शब्द उत्पद्यते, इतस्ततः धावति, पुनश्च विलीयते। 'क' इति शब्दः गुरुमुखात् उत्पद्यते। कक्षस्थ समस्तविद्यार्थिश्रोत्रं प्रति गत्वा अर्थावबोधं जनयति। गुरुमुखात् 'क' इत्येकैव शब्दः उत्पन्नः। उत्पन्नः स एकः 'क' इति शब्दः अनेकीभूय अर्थात् सहस्रशः, लक्षशः, कोटिशः उत्पद्य सर्वान् विद्यार्थीन् प्रति गच्छति। गत्वा ततः कुत्र गच्छति? स्वकारणे आकाशे एव विलीयते। अत्र जिज्ञासा जागर्त्ति, एकत्र उत्पन्नः शब्दः बहुत्र गमनकारणं किं स्यात्? इति। तर्हि समाधिः - आकाशगत- गुरुत्वाकर्षणशक्तिरेव कारणमिति। वस्तुतः आकाश आकाशीयांशान् आकृष्यतीति वक्तुं न शक्यते, यतो हि आकाशस्य अंशत्वं मनसापि चिन्तितुं न शक्यते। अतः कारणगत-आकाशः कार्यगतशब्दान् सर्वतो आकृष्य स्वकारणे विलीनं कारयतीति विज्ञानम्। एतावत्पर्यन्तं सजातीय-साम्यगतगुरुत्वविषये विचारितम्।

इतः परं विजातीय-विषमगतगुरुत्वाकर्षणं विचारयामः। सूर्यः स्वकिरणैः अम्बोधिं परितप्य जलबिन्दून् ऊर्ध्वं प्रति आकर्षति। स एव ऊष्मः। ऊर्ध्वगतस्तान् बिन्दून् वायुः स्वशक्त्या इतस्ततः भ्रामयति, स एव मेघः। भ्रमितजलबिन्दून् पृथिवी स्वीयगुरुत्वशक्त्या स्वाभिमुखम् आकृष्यति, सा एव वृष्टिः। अनेन विध्या पृथिवीं, पृथिवीतरान् ग्रहान् भास्करः स्वकिरणैः आकृष्य स्वायत्तीकृतवान्। "दाधर्थ पृथिवीमभितो मयूखैः"[7] इति यजुर्वेदमन्त्रस्तत्र प्रमाणम्। तथा- "सविता यन्त्रैः पृथिवीं अरम्नात्"।[8] "चकृषे भूमिम्" अर्थात् सूर्यः भूमिं सदा आकृष्यतीत्यादीनि प्रमणानि अगण्यानि द्रष्टुं शक्नुमः। गुरुत्वस्य न केवलं आकर्षनशक्तिः, स्थायीकरणशक्तिरपि वर्तते। एवं भौगोलिक-खगोलक्रियाणां प्रति मूलकारणं गुरुत्वमेव। इतोऽपि बहुत्र विजातीयं-गुरुत्वाकर्षणशक्त्या प्रापञ्चिकक्रियाकलापाः, रसायनक्रियाकलापैश्च वस्तूत्पत्तयः दृश्यन्ते।FX

[7]. यजुर्वेदः - ५.१६।
[8]. ऋग्वेदसंहिता - १०.१४९.१।

# सन्दर्भग्रन्थसूची

१. तर्कसङ्ग्रहः - श्रीमदन्नम्भट्टः, सं- श्रीकृष्णवल्लभाचार्यः, चौखम्बा विद्याभवन्, वाराणसी।

२. बृहज्जाबालोपनिषत्, मोतीलाल् बनारसीदास्, वाराणसी।

३. व्याकरणमहाभाष्यम्, महर्षिपतञ्जलिविरचितम्, चौखम्बा संस्कृत प्रतिष्ठानम्, देहली, १९८८।

४. पञ्चसिद्धान्तिका – वराहमिहिरः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।

५. सिद्धान्तशिरोमणिः - भास्कराचार्यः,अम्बिकाचरन् चक्रवर्ति, मेडिकल् हाल् प्रेस्, वाराणसी-केन्ट्, १९१७।

६. मन्त्रपुष्पम् - परिष्कर्ता स्वामी देवरूपानन्दः, रामकृष्णमठ, खार्, मुम्बई, २००३।

७. ऋग्वेदसंहिता, सं - रामगोविन्द शास्त्री, चौखम्भा विद्याभवन्, वाराणसी, १९९७।

८. वेदान्तसन्दर्भः, स्वामी महेशानन्दगिरि जी महराज, महेश-अनुसन्धान-संस्थानम्, वाराणसी, १९८९।

९. तर्कभाषा, केशवमिश्रप्रणीता, व्या०आ.विश्वेश्वरसोद्धान्त-शिरोमणिः, चौखम्बा संस्कृतभवनम्, वाराणसी, २००९।

१०. न्यायभाष्यम्, वात्स्यायनमुनिप्रणीतम्, सुदर्शनाचार्य-विरचितया प्रसन्नपदाख्यटीकासहिता, सम्पादकः - स्वामी द्वारिकादासशास्त्री, सुधी प्रकाशनम्, वाराणसी।

११. प्रशस्तपादभाष्यम्, जगदीशसूक्तिसहितम्, कलकता-संस्कृतसाहित्यपरिषद्भवनात् प्रकाशितम्, कोलकता।